।। শ্ৰীৰাঘৱেংদ্ৰ মংগলাষ্টকম ।।

শ্ৰীমদ্ৰামপদাৰৱিংদমধুপঃ শ্ৰীমধ্ৱৱংশাধিপঃ
সচ্ছিষ্যোডু গণোডুপঃ শ্ৰিতজগদ্গীৰ্ৱাণসত্পাদপঃ ।
অত্যৰ্থং মনসা কৃতাচ্যুতজপঃ পাপাংধকাৰাতপঃ
শ্ৰীমত্সদ্গুৰুৰাঘৱেংদ্ৰযতিৰাট কুৰ্যাদ্ধ্ৰুৱং মংগলম ।। ১ ।।
কৰ্মংদীংদ্ৰ সুধীংদ্ৰ সদ্গুৰু কৰাংভোজোদ্ভৱঃ সংততং
প্ৰাজ্যধ্যানৱশীকৃতাখিলজগদ্ৱাস্তৱ্যলক্ষ্মীধৱঃ ।
সচ্ছাস্ত্ৰাতিৱিদূষকাখিলমৃষাৱাদীভকংঠীৰৱঃ
শ্ৰীমত্সদ্গুৰুৰাঘৱেংদ্ৰযতিৰাট কুৰ্যাদ্ধ্ৰুৱং মংগলম ।। ২ ।।
সালংকাৰককাৱ্যনাটককলাকাণাদপাতংজল
ত্ৰয্যৰ্থস্মৃতিজৈমিনীযকৱিতাসংগীতপাৰংগতঃ ।
ৱিপ্ৰক্ষত্ৰৱিডংঘ্ৰিজাতমুখৰানেকপ্ৰজাসেৱিতঃ
শ্ৰীমত্সদ্গুৰুৰাঘৱেংদ্ৰযতিৰাট কুৰ্যাদ্ধ্ৰুৱং মংগলম ।। ৩ ।।
ৰংগোত্তুংগতৰংগমংগলকৰশ্ৰীতুংগভদ্ৰাতট
প্ৰত্যস্থদ্ৱিজপুংগৱালযলসন্মংত্ৰালযাখ্যে পুৰে ।
নৱ্যেংদ্ৰোপলনীলভৱ্যকৰসদ্বৃংদাৱনাংতৰ্গতঃ
শ্ৰীমত্সদ্গুৰুৰাঘৱেংদ্ৰযতিৰাট কুৰ্যাদ্ধ্ৰুৱং মংগলম ।। ৪ ।।
ৱিদ্ৱদ্ৰাজশিৰঃকিৰীটখচিতানৰ্ঘ্যোৰুৰত্নপ্ৰভা
ৰাগাঘৌঘহপাদুকাদ্ৱযচৰঃ পদ্মাক্ষমালাধৰঃ ।
ভাস্ৱদ্দংডকমংডলূজ্জ্ৱলকৰো ৰক্তাংবৰাডংবৰঃ
শ্ৰীমত্সদ্গুৰুৰাঘৱেংদ্ৰযতিৰাট কুৰ্যাদ্ধ্ৰুৱং মংগলম ।। ৫ ।।
যদ্বৃংদাৱনসপ্ৰদক্ষিণনমস্কাৰাভিষেকস্তুতি
ধ্যানাৰাধনমৃদ্ৱিলেপনমুখানেকোপচাৰান সদা ।
কাৰংকাৰমভিপ্ৰযাংতি চতুৰো লোকাঃ পুমৰ্থান সদা
শ্ৰীমত্সদ্গুৰুৰাঘৱেংদ্ৰযতিৰাট কুৰ্যাদ্ধ্ৰুৱং মংগলম ।। ৬ ।।

ৱেদৱ্যাসমুনীশমধ্ৱয়তিৰাট্টীকার্য্ৱাক্যামৃতং
জ্ঞাত্ৱাঽদ্ৱৈতমতং হলাহলসমং ত্যক্ত্ৱা সমাখ্যাপ্তয়ে ।
সংখ্যাৱত্সুখদাং দশোপনিষদাং ৱ্যাখ্যাং সমাখ্যান মুদা
শ্ৰীমত্সদ্গুৰুৰাঘৱেংদ্ৰয়তিৰাট কুর্যাদ্ধ্ৰুৱং মংগলম ।। ৭ ।।
শ্ৰীমদ্দ্ৱৈষ্ণৱলোকজালকগুৰুঃ শ্ৰীমত্পৰিৱ্ৰাড্ভৱুঃ
শাস্ত্ৰে দেৱগুৰুঃ শ্ৰিতামৰতৰুঃ প্ৰত্যূহগোত্ৰস্ৱৰুঃ ।
চেতোঽতীতশিৰুস্তথা জিতৱৰুঃ সত্সৌখ্যসংপত্কৰুঃ
শ্ৰীমত্সদ্গুৰুৰাঘৱেংদ্ৰয়তিৰাট কুর্যাদ্ধ্ৰুৱং মংগলম ।। ৮ ।।
য়ঃ সংধ্যাস্ৱনিশং গুৰোৰ্ৱ্ৰতিপতেঃ সন্মংগলস্যাষ্টকং
সদ্যঃ পাপহৰং স্ৱসেৱিৱিদুষাং ভক্ত্যৈৱ বাভাষিতম ।
ভক্ত্যা ৱক্তি সুসংপদং শুভপদং দীর্ঘায়ুৰাৰোগ্যকং
কীর্তিং পুত্ৰকলত্ৰবাংধৱসুহৃন্মূর্তীঃ প্ৰয়াতি ধ্ৰুৱম ।। ৯ ।।
।। ইতি শ্ৰীমদপ্পণাচার্যকৃতং শ্ৰীৰাঘৱেংদ্ৰমংগলাষ্টকম ।।

www.yousigma.com